# ४२. वस्तुपाल-तेजःपालमन्त्रिकल्पः ।

**श्रीवस्तुपाल-तेजःपालौ** मन्त्रीश्वरावुभावास्ताम् । यौ भ्रातरौ प्रसिद्धौ कीर्तनसंख्यां तयोर्ब्रूमः ॥ १ ॥

पूर्वं **गूर्जर**धरित्रीमण्डनायां **मण्डली**महानगर्यां श्री**वस्तुपाल-तेजःपाला**द्या वसन्ति स्म । अन्यदा श्री**मत्पत्तन**वास्तव्य**प्राग्वाटान्वय**ठक्कुरश्री**चण्डपा**त्मज[2] ठक्कुरश्री[3]**चण्डप्रसादा**ङ्गज मन्त्रिश्री**सोम**कुलावतंस ठक्कुरश्री**आसराज**नन्दनौ **कुमारदेवी**कुक्षिसरोवरराजहंसौ श्री**वस्तुपाल-तेजःपालौ** श्री**शत्रुञ्जय-गिरिनारा**दितीर्थयात्रायै प्रस्थितौ । **हडाला**ग्रामं गत्वा यावत्स्वां विभूतिं[4] चिन्तयतस्तावल्लक्षत्रयं सर्वस्वं जातम् । ततः **सुराष्ट्रा**स्वसौस्थ्यमाकलय्य लक्षमेकमवन्यां निधातुं निशीथे महाऽश्वत्थतलं खानयामासतुः । तयोः खानयतोः कस्यापि प्राक्तनः कनकपूर्णः शौल्वकलशो निरगात् । तमादाय श्री**वस्तुपालस्तेजःपाल**जायाम**नुपमादेवीं** मान्यतयाऽपृच्छत्—क्वैतन्निधीयत ? इति । तयोक्तम्—गिरिशिखर एवैतदुच्चैः स्थाप्यते यथा प्रस्तुतनिधिवन्नान्यसाद्भवति । तच्छ्रुत्वा श्री**वस्तुपाल**स्तद् द्रव्यं श्री**शत्रुञ्जयोज्जयन्ता**दावव्ययत् । कृतयात्रो व्यावृत्तो **धवलक्क**पुरमगात् ।

अत्रान्तरे **महणदेवी** नाम **कन्यकुब्जे**श्वरसुता, [या] जनकात् कञ्चुलिकापदे **गूर्जर**धरित्रीमवाप्य तदाधिपत्यं भुक्त्वा मृता सती तत्रैव देशाधिष्ठात्री देवता समजनि । सैकदा स्वप्ने **वीरधवल**नृपस्याचीकथत्—यद्व**स्तुपाल-तेजःपालौ** राज्यचिन्तकप्राग्रहरौ विधाय सुखेन राज्यं शाधि । इत्थं कृते राज्य-राष्ट्रवृद्धिस्तव भवित्री—इत्यादिश्य स्वं च प्रकाश्य तिरोदधे देवी । प्रातरुत्थाय नृपति**र्वस्तुपाल-तेजःपाला**वाहूय सत्कृत्य च ज्यायसः **स्तम्भतीर्थ-धवलक्क**योराधिपत्यमदात् । **तेजःपाल**स्य तु सर्वराज्यव्यापारमुद्रां ददौ । ततस्तौ षड्दर्शनदान-नानाविधधर्मस्थानविधापनादिभिः सुकृतशतानि चिन्वन्तौ निन्यतुः समयम् ।

तथा हि—लक्षमेकं सपादं जिनबिम्बानां कारितम् । अष्टादश कोट्यः षण्णवतिर्लक्षाः श्री**शत्रुञ्जय**तीर्थे द्रविणं व्ययितम् । द्वादश कोट्योऽशीतिलक्षाः श्री **उज्जयन्ते** । द्वादशकोट्यस्त्रिपञ्चाशल्लक्षा **अर्बुद**शिखरे **लूणिगवसत्याम्** । नवशतानि चतुरशीतिश्च पौषधशालाः कारिताः । पञ्चशतानि दन्तमयसिंहासनानाम्, पञ्चशतानि पञ्चोत्तराणि समवसरणानां जादरमयानाम् । ब्रह्मशालाः सप्तशतानि सप्तदशानि । सत्राकाराणां सप्तशती । तपस्वि-कापालिकमठानां सर्वेषां भोजननिर्वापादिदानं कृतम् । त्रिंशच्छतानि द्व्युत्तराणि माहेश्वरायतनानाम् । त्रयोदशशतानि चतुरुत्तराणि शिखरबद्धजैनप्रासादानाम् । त्रयोविंशतिः शतानि जैनचैत्योद्धाराणाम् । अष्टादशकोटिसुवर्णव्ययेन सरस्वतीभाण्डागाराणां स्थानत्रये भरणं कृतम् । पञ्चशती ब्राह्मणानां नित्यं वेदपाठं करोति स्म । वर्षमध्ये संघपूजात्रितयम् । पञ्चदशशती

1 Pa छत्तीस° । 2 Pa नास्ति; B चन्द्रपात्मज । 3 B चन्द्रप्रसा° । 4 C 'विभूतिं' नास्ति ।

श्रमणानां गृहे नित्यं विहरति स । तटिक-कार्पटिकानां सहस्रं साधिकं प्रत्यहमभुङ्क्त । त्रयोदश तीर्थयात्राः संघपतीभूय कृताः । तत्र प्रथमयात्रायां चत्वारि सहस्राणि पञ्चशतानि शकटानां सशय्यापालकानां, सप्तशती सुखासनानां, अष्टादशशती वाहिनीनां, एकोनविंशतिः शतानि श्रीकरीणां, एकविंशतिः शतानि श्वेताम्बराणां, एकादशशती दिगम्बराणां, चत्वारि शतानि सार्धानि जैनगायनानां, त्रयस्त्रिंशच्छती बन्दिजनानां, चतुरशीतिस्तडागाः सुबद्धाः, चतुःशती चतुःषष्ट्यधिका वापीनां, पाषाणमयानि त्रिंशद्-द्वात्रिंशद्दुर्गाणि, दन्तमयजैनरथानां चतुर्विंशतिः, विंशं शतं शाकघटितानां, सरस्वतीकण्ठाभरणादीनि चतुर्विंशतिर्बिरुदानि श्री**वस्तुपाल**स्य । चतुःषष्टिर्मसीतयः कारिताः । दक्षिणस्यां **श्रीपर्वतं** यावत्, पश्चिमायां **प्रभासं** यावत्, उत्तरस्यां **केदारं** यावत्, पूर्वस्यां **वाराणसीं** यावत् तयोः कीर्तनानि । सर्वाग्रेण त्रीणि कोटिशतानि चतुर्दश लक्षा अष्टादश सहस्राणि अष्टशतानि लोष्टिकत्रितयोनानि द्रव्यव्ययः । त्रिषष्टिवारान् संग्रामे जैत्रपत्रं गृहीतम् । अष्टादश वर्षाणि तयोर्व्यापृतिः ।

एवं तयोः पुण्यकृत्यानि कुर्वतोः कियताऽपि कालेन श्री**वीरधवल**नृपः कालधर्ममवापत्[1] । ततस्तत्पट्टे तदीयस्तनयः श्रीमान् **वीसलदेव**स्ताभ्यां मन्त्रिप्रवराभ्यां राज्येऽभिषिक्तः । सोऽपि समर्थः सन् क्रमेण दुर्मदः सचिवान्तरं विधाय मन्त्रि**तेजःपाल**मपाचकार । तदवलोक्य राज्ञः पुरोधाः **सोमेश्वर**नामा महाकविर्नृपमुद्दिश्य साक्षेपं नव्यं काव्यमपठत् । तथा–

मासान्मांसलपाटलापरिमलव्यालोलतोलम्बतः प्राप्य प्रौढिमिमां समीर महतीं पश्य त्वया यत्कृतम् ।
सूर्याचन्द्रमसौ निरस्ततमसौ दूरं तिरस्कृत्य यत् पादस्पर्शसहं विहायसि रजः स्थाने तयोः स्थापितम् ॥ १ ॥

इत्यादि । तयोः पुरुषरत्नयोर्वृत्तशेषमादित उत्पत्तिस्वरूपं च लोकप्रसिद्धित एवावगन्तव्यम् ।

गीताद्गायनवर्येण सूडाद्विज्ञाय कीर्तिता । कीर्तनानामियं संख्या श्रीमतोर्मन्त्रिमुख्ययोः ॥ १ ॥
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते । अर्हन्तश्च तयोश्चित्तमध्यवात्सुरहर्निशम् ॥ २ ॥
तत्तीर्थरूपयोर्युक्त्या पुरुषश्रेष्ठयोस्तयोः । कीर्तनोत्कीर्तनेनापि न्याय्या कल्पकृतिर्न किम् ॥ ३ ॥
इत्यालोच्य हृदा कल्पलेशं मन्त्रीशयोस्तयोः । एतं विरचयां चक्रुः श्री**जिनप्रभ**सूरयः ॥ ४ ॥

**॥ श्रीमहामात्यवस्तुपालतेजःपालकीर्तनसंख्याकल्पः ॥**

॥ ग्रं० ५३, अ० ६ ॥

---

1 C अगात् ।